# Shri Lalitambika Divyashtottarashatanamavalih

# શ્રીલલિતામ્બિકા દિવ્યાષ્ટોત્તરશતનામાવલિઃ

## Document Information

Text title : Lalitambika Divya AshTottarashatanamavali 108 names shivakamasundaryamba AshtottarashatanAmavali

File name : lalitAmbikAdivyAShTottarashatanAmAvalI.itx

Category : devii, lalitA, aShTottarashatanAmAvalI, nAmAvalI, devI

Location : doc_devii

Transliterated by : Vinu Prasad, Aruna Narayanan

Proofread by : Vinu Prasad, Aruna Narayanan

Description/comments : See corresponding stotram. The title with shivakAmasundaryambA is from Nataraja Naam Manjari p 220

Source : mantrarAjakalpa

Latest update : July 28, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 28, 2021

*sanskritdocuments.org*

# શ્રીલલિતામ્બિકા દિવ્યાષ્ટોત્તરશતનામાવલિઃ

શિવકામસુન્દર્યમ્બાષ્ટોત્તરશતનામાવલિઃ ચ
    સ્તોત્રસ્ય પૂર્વપીઠિકા ।
શ્રીષણ્મુખ ઉવાચ ।
વન્દે વિઘ્નેશ્વરં શક્તિં વન્દે વાણીં વિધિં હરિમ્ ।
વન્દે લક્ષ્મીં હરં ગૌરીં વન્દે માયા મહેશ્વરમ્ ॥ ૧॥

વન્દે મનોન્મયીં દેવીં વન્દે દેવં સદાશિવમ્ ।
વન્દે પરશિવં વન્દે શ્રીમત્રિપુરસુન્દરીમ્ ॥ ૨॥

પઞ્ચબ્રહ્માસનાસીનાં સર્વાભીષ્ટાર્થસિદ્ધયે ।
સર્વજ્ઞ ! સર્વજનક ! સર્વેશ્વર ! શિવ ! પ્રભો ! ॥ ૩॥

નામ્નામષ્ટોત્તરશતં શ્રીદેવ્યાઃ સત્યમુત્તમમ્ ।
શ્રોતુમિચ્છામ્યઽહં તાત! નામસારાત્મકં સ્તવમ્ ॥ ૪॥

શ્રીશિવ ઉવાચ ।
તદ્વદામિ તવ સ્નેહાચ્છૃણુ ષણ્મુખ ! તત્ત્વતઃ ।

અથ નામાવલિઃ ।
ૐ મહામનોન્મન્યૈ નમઃ ।
ૐ શક્ત્યૈ નમઃ ।
ૐ શિવશક્ત્યૈ નમઃ ।
ૐ શિવઙ્કર્યૈ નમઃ ।
ૐ ઇચ્છાશક્તિસ્વરૂપિણ્યૈ નમઃ ।
ૐ ક્રિયાશક્તિસ્વરૂપિણ્યૈ નમઃ ।
ૐ જ્ઞાનશક્તિસ્વરૂપિણ્યૈ નમઃ ।
ૐ શાન્ત્યાતીતા કલાયૈ નમઃ ।
ૐ નન્દાયૈ નમઃ ।
ૐ શિવમાયાયૈ નમઃ । ૧૦

ૐ શિવપ્રિયાયૈ નમઃ ।
ૐ સર્વજ્ઞાયૈ નમઃ ।
ૐ સુન્દર્યૈ નમઃ ।
ૐ સૌમ્યાયૈ નમઃ ।
ૐ સચ્ચિદાનન્દવિગ્રહાયૈ નમઃ ।
ૐ પરાત્પરામય્યૈ નમઃ ।
ૐ બાલાયૈ નમઃ ।
ૐ ત્રિપુરાયૈ નમઃ ।
ૐ કુણ્ડલ્યૈ નમઃ ।
ૐ શિવાયૈ નમઃ । ૨૦
ૐ રુદ્રાણ્યૈ નમઃ ।
ૐ વિજયાયૈ નમઃ ।
ૐ સર્વાયૈ નમઃ ।
ૐ સર્વાણ્યૈ નમઃ ।
ૐ ભુવનેશ્વર્યૈ નમઃ ।
ૐ કલ્યાણ્યૈ નમઃ ।
ૐ શૂલિન્યૈ નમઃ ।
ૐ કાન્તાયૈ નમઃ ।
ૐ મહાત્રિપુરસુન્દર્યૈ નમઃ ।
ૐ માલિન્યૈ નમઃ । ૩૦
ૐ માનિન્યૈ નમઃ ।
ૐ શર્વાયૈ નમઃ ।
ૐ મગ્નોલ્લાસાયૈ નમઃ ।
ૐ મોહિન્યૈ નમઃ ।
ૐ માહેશ્વર્યૈ નમઃ ।
ૐ માતઙ્ગ્યૈ નમઃ ।
ૐ શિવકામાયૈ નમઃ ।
ૐ શિવાત્મિકાયૈ નમઃ ।
ૐ કામાક્ષ્યૈ નમઃ ।
ૐ કમલાક્ષ્યૈ નમઃ । ૪૦
ૐ મીનાક્ષ્યૈ નમઃ ।
ૐ સર્વસાક્ષિણ્યૈ નમઃ ।

ૐ ઉમાદેવ્યૈ નમઃ ।
ૐ મહાકાલ્યૈ નમઃ ।
ૐ શ્યામાયૈ નમઃ ।
ૐ સર્વજનપ્રિયાયૈ નમઃ ।
ૐ ચિત્પરાયૈ નમઃ ।
ૐ ચિદ્ઘનાનન્દાયૈ નમઃ ।
ૐ ચિન્મયાયૈ નમઃ ।
ૐ ચિત્સ્વરૂપિણ્યૈ નમઃ । ૫૦
ૐ મહાસરસ્વત્યૈ નમઃ ।
ૐ દુર્ગાયૈ નમઃ ।
ૐ જ્વાલા દુર્ગાયૈ નમઃ ।
ૐ અતિમોહિન્યૈ નમઃ ।
ૐ નકુલ્યૈ નમઃ ।
ૐ શુદ્ધવિદ્યાયૈ નમઃ ।
ૐ સચ્ચિદાનન્દવિગ્રહાયૈ નમઃ ।
ૐ સુપ્રભાયૈ નમઃ ।
ૐ સ્વપ્રભાયૈ નમઃ ।
ૐ જ્વાલાયૈ નમઃ । ૬૦
ૐ ઇન્દ્રાક્ષ્યૈ નમઃ ।
ૐ વિશ્વમોહિન્યૈ નમઃ ।
ૐ મહેન્દ્રજાલમધ્યસ્થાયૈ નમઃ ।
ૐ માયામયવિનોદિન્યૈ નમઃ ।
ૐ શિવેશ્વર્યૈ નમઃ ।
ૐ વૃષારૂઢાયૈ નમઃ ।
ૐ વિદ્યાજાલવિનોદિન્યૈ નમઃ ।
ૐ મન્ત્રેશ્વર્યૈ નમઃ ।
ૐ મહાલક્ષ્મ્યૈ નમઃ ।
ૐ મહાકાલ્યૈ નમઃ । ૭૦
ૐ ફલપ્રદાયૈ નમઃ ।
ૐ ચતુર્વેદવિશેષજ્ઞાયૈ નમઃ ।
ૐ સાવિત્ર્યૈ નમઃ ।
ૐ સર્વદેવતાયૈ નમઃ ।

ૐ મહેન્દ્રાણ્યૈ નમઃ ।
ૐ ગણાધ્યક્ષાયૈ નમઃ ।
ૐ મહાભૈરવમોહિન્યૈ નમઃ ।
ૐ મહામય્યૈ નમઃ ।
ૐ મહાઘોરાયૈ નમઃ ।
ૐ મહાદેવ્યૈ નમઃ । ૮૦
ૐ મદાપહાયૈ નમઃ ।
ૐ મહિષાસુરસંહન્ત્ર્યૈ નમઃ ।
ૐ ચણ્ડમુણ્ડકુલાન્તકાયૈ નમઃ ।
ૐ ચક્રેશ્વરી ચતુર્વેદાયૈ નમઃ ।
ૐ સર્વાદ્યૈ નમઃ ।
ૐ સુરનાયિકાયૈ નમઃ ।
ૐ ષડ્શાસ્ત્રનિપુણાયૈ નમઃ ।
ૐ નિત્યાયૈ નમઃ ।
ૐ ષડ્દર્શનવિચક્ષણાયૈ નમઃ ।
ૐ કાલરાત્ર્યૈ નમઃ । ૯૦
ૐ કલાતીતાયૈ નમઃ ।
ૐ કવિરાજમનોહરાયૈ નમઃ ।
ૐ શારદાતિલકાયૈ નમઃ ।
ૐ તારાયૈ નમઃ ।
ૐ ધીરાયૈ નમઃ ।
ૐ શૂરજનપ્રિયાયૈ નમઃ ।
ૐ ઉગ્રતારાયૈ નમઃ ।
ૐ મહામાર્યૈ નમઃ ।
ૐ ક્ષિપ્રમાર્યૈ નમઃ ।
ૐ રણપ્રિયાયૈ નમઃ । ૧૦૦
ૐ અન્નપૂર્ણેશ્વરી માત્રે નમઃ ।
ૐ સ્વર્ણકાન્તિતટિપ્રભાયૈ નમઃ ।
ૐ સ્વરવ્યઞ્જનવર્ણાઢ્યાયૈ નમઃ ।
ૐ ગદ્યપદ્યાદિકારણાયૈ નમઃ ।
ૐ પદવાક્યાર્થનિલયાયૈ નમઃ ।
ૐ બિન્દુનાદાદિકારણાયૈ નમઃ ।

ૐ મોક્ષેશી મહિષી નિત્યાયૈ નમઃ ।
ૐ ભુક્તિમુક્તિફલપ્રદાયૈ નમઃ ।
ૐ વિજ્ઞાનદાયિની પ્રાજ્ઞાયૈ નમઃ ।
ૐ પ્રજ્ઞાનફલદાયિન્યૈ નમઃ । ૧૧૦
ૐ અહઙ્કારા કલાતીતાયૈ નમઃ ।
ૐ પરાશક્તિઃ પરાત્પરાયૈ નમઃ । ૧૧૨

સ્તોત્રસ્ય ફલશ્રુતિઃ ।

સર્વપાપક્ષય કરં મહાપાતકનાશનમ્ ।
સર્વવ્યાધિહરં સૌખ્યં સર્વજ્વરવિનાશનમ્ ॥ ૧॥

ગ્રહપીડાપ્રશમનં સર્વશત્રુવિનાશનમ્ ।
આયુરારોગ્યધનદં સર્વમોક્ષશુભપ્રદમ્ ॥ ૨॥

દેવત્વમમરેશત્વં બ્રહ્મત્વં સકલપ્રદમ્ ।
અગ્નિસ્તમ્ભં જલસ્તમ્ભં સેનાસ્તમ્ભાદિદાયકમ્ ॥ ૩॥

શાકિનીડાકિનીપીડા હાકિન્યાદિનિવારણમ્ ।
દેહરક્ષાકરં નિત્યં પરતન્ત્રનિવારણમ્ ॥ ૪॥

મન્ત્રં યન્ત્રં મહાતન્ત્રં સર્વસિદ્ધિપ્રદં નૃણામ્ ।
સર્વસિદ્ધિકરં પુંસામદૃશ્યત્વાકરં વરમ્ ॥ ૫॥

સર્વાકર્ષકરં નિત્યં સર્વસ્ત્રીવશ્યમોહનમ્ ।
મણિમન્ત્રૌષધીનાં ચ સિદ્ધિદં શીઘ્રમેવ ચ ॥ ૬॥

ભયચ્ચૌરાદિશમનં દુષ્ટજન્તુનિવારણમ્ ।
પૃથિવ્યાદિજનાનાં ચ વાક્સ્થાનાદિપરો વશમ્ ॥ ૭॥

નષ્ટદ્રવ્યાગમં સત્યં નિધિદર્શનકારણમ્ ।
સર્વથા બ્રહ્મચારીણાં શીઘ્રકન્યાપ્રદાયકમ્ ॥ ૮॥

સુપુત્રફલદં શીઘ્રમશ્વમેધફલપ્રદમ્ ।
યોગાભ્યાસાદિ ફલદં શ્રીકરં તત્ત્વસાધનમ્ ॥ ૯॥

મોક્ષસામ્રાજ્યફલદં દેહાન્તે પરમં પદમ્ ।
દેવ્યાઃ સ્તોત્રમિદં પુણ્યં પરમાર્થં પરમં પદમ્ ॥ ૧૦॥

વિધિના વિષ્ણુના દિવ્યં સેવિતં મયા ચ પુરા ।

સપ્તકોટિમહામન્ત્રપારાયણફલપ્રદમ્ ॥ ૧૧॥

ચતુર્વર્ગપ્રદં નૃણાં સત્યમેવ મયોદિતમ્ ।
નામ્નામષ્ટોત્તરશતં યચ્છામ્યઽહં સુખપ્રદમ્ ॥ ૧૨॥

કલ્યાણીં પરમેશ્વરીં પરશિવાં શ્રીમત્ત્રિપુરસુન્દરીં
મીનાક્ષીં લલિતામ્બિકામનુદિનં વન્દે જગન્મોહિનીમ્ ।
ચામુણ્ડાં પરદેવતાં સકલસૌભાગ્યપ્રદાં સુન્દરીં
દેવીં સર્વપરાં શિવાં શશિનિભાં શ્રીરાજરાજેશ્વરીમ્ ॥

ઇતિ શ્રીમન્ત્રરાજકલ્પે મોક્ષપાદે સ્કન્દેશ્વરસંવાદે
શ્રીલલિતાદિવ્યાષ્ટોત્તરશતનામાવલિઃ અથવા
શ્રીશિવકામસુન્દર્યમ્બાષ્ટોત્તરશતનામાવલિઃ સમાપ્તા ।

There are 112 names as mentioned in the scan.
The nAmAvalI is also titled as gauryaShTottarashatanAmAvaliH (2)
shivakAmasundaryambAShTottarashatanAmAvaliH (Nataraja Naama Manjari p220)
with little variations.

Encoded and proofread by Vinu Prasad, Aruna Narayanan

---

*Shri Lalitambika Divyashtottarashatanamavalih*

pdf was typeset on July 28, 2021

Please send corrections to *sanskrit@cheerful.com*